NPTEL ONLINE CERTIFICATION COURSES

INTERMEDIATE LEVEL OF SPOKEN SANSKRIT

DR. ANURADHA CHOUDRY

DEPARTMENT OF HUMANITIES AND SOCIAL SCIENCES

IIT Kharagpur

Lecture 18: Revision and Exercises: third person pronouns and nouns (m/n/f) in the plural

NPTEL

CONCEPTS COVERED

- Revision and exercises based on a conversation for third person pronouns and nouns in all cases for पुंलिङ्ग (puṁliṅga – masculine) and नपुंसकलिङ्ग (napuṁsakaliṅga – neuter) words ending with अकार (akāra – letter ‘a’) and स्त्रीलिङ्ग (strīliṅga – feminine) words ending with आकार (ākāra – letter ‘ā’) and ईकार (īkāra – letter ‘ī’) in the बहुवचन (bahuvacana – plural) forms
- Practice of धातुरूप (dhāturūpa – verb conjugation)
- Building of vocabulary

NPTEL

पुनःस्मरणम् punaḥsmaraṇam – Revision

3rd Person Pronouns and Nouns in the Plural (m[n] ‘a’ ending / f ‘ā’ & ‘ī’ endings)

NPTEL

वचनम् -> vacanam

बहुवचनम्
bahuvacanam

विभक्तिः - vibhaktiḥ	किम् (m [n])	(ए)तद् (m [n])	जनक (m)	मित्र [n]	किम् (f)	(ए)तद् (f)	अम्बा (f)	सहोदरी (f)
प्रथमा prathamā	के [कानि] ke [kāni]	(ए)ते [(ए)तानि] (e)te [(e)tāni]	जनकाः janakāḥ	मित्राणि mitrāṇi	काः kāḥ	ताः / एताः tāḥ / etāḥ	अम्बाः ambāḥ	सहोदर्यः sahodaryaḥ
द्वितीया dvitīyā	कान् [कानि] kān [kāni]	(ए)तान् [(ए)तानि] (e)tān [(e)tāni]	जनकान् janakān	मित्राणि mitrāṇi	काः kāḥ	(ए)ताः (e)tāḥ	अम्बाः ambāḥ	सहोदरीः sahodarīḥ
तृतीया tritīyā	कैः kaiḥ	(ए)तैः (e)taiḥ	जनकैः janakaiḥ	मित्रैः mitraiḥ	काभिः kābhiḥ	(ए)ताभिः (e)tābhiḥ	अम्बाभिः ambābhiḥ	सहोदरीभिः sahodarībhiḥ
चतुर्थी caturthī	केभ्यः kebhyaḥ	(ए)तेभ्यः (e)tebhyaḥ	जनकेभ्यः janakebhyaḥ	मित्रेभ्यः mitrebhyaḥ	काभ्यः kābhyaḥ	(ए)ताभ्यः (e)tābhyaḥ	अम्बाभ्यः ambābhyaḥ	सहोदरीभ्यः sahodarībhyaḥ
पञ्चमी pañcamī	केभ्यः kebhyaḥ	(ए)तेभ्यः (e)tebhyaḥ	जनकेभ्यः janakebhyaḥ	मित्रेभ्यः mitrebhyaḥ	काभ्यः kābhyaḥ	(ए)ताभ्यः (e)tābhyaḥ	अम्बाभ्यः ambābhyaḥ	सहोदरीभ्यः sahodarībhyaḥ
षष्ठी ṣaṣṭhī	केषाम् keṣām	(ए)तेषाम् (e)teṣām	जनकानाम् janakānām	मित्राणाम् mitrāṇām	कासाम् kāsām	(ए)तासाम् (e)tāsām	अम्बानाम् ambānām	सहोदरीणाम् sahodarīṇām
सप्तमी saptamī	केषु keṣu	(ए)तेषु (e)teṣu	जनकेषु janakeṣu	मित्रेषु mitreṣu	कासु kāsu	(ए)तासु (e)tāsu	अम्बासु ambāsu	सहोदरीषु sahodarīṣu
(सम्बोधनम्) (sambodhanam)			हे जनकाः he janakāḥ	हे मित्राणि he mitrāṇi			हे अम्बाः he ambāḥ	हे सहोदर्यः he sahodaryaḥ

NPTEL

सम्भाषणम् (sambhāṣaṇam) - Conversation

NPTEL

आर्या - तव ग्रामे किं किम् अस्ति ?
āryā - tava grāme kiṁ kim asti ?

शिष्यः - मम ग्रामे - विद्यालयः अस्ति।
śiṣyaḥ - mama grāme - vidyālayaḥ asti|

- मन्दिरम् अस्ति। (
- mandiram asti|

- भोजनशाला अस्ति।
- bhojanaśālā asti|

- नदी च अस्ति।
- nadī ca asti|

NPTEL

आर्या - युष्माकं ग्रामे किं किम् अस्ति ?

āryā - yuṣmākaṁ grāme kiṁ kim asti ?

1p1m

शिष्यः - अस्माकं ग्रामे - विद्यालयाः सन्ति।

śiṣyaḥ - asmākaṁ grāme - vidyālayāḥ santi|

1pln - मन्दिराणि सन्ति।

- mandirāṇi santi|

1plfa - भोजनशालाः सन्ति।

- bhojanaśālāḥ santi|

1plfi - नद्यः सन्ति।

- nadyaḥ santi|

NPTEL

आ - सः तत् सा च कथं सन्ति?

ā - saḥ tat sā ca kathaṁ santi?

शि - सः विद्यालयः उत्तमः अस्ति।

śi - saḥ vidyālayaḥ uttamaḥ asti|

तत् मन्दिरं सुन्दरम् अस्ति।

tat mandiraṁ sundaram asti|

सा भोजनशाला स्वादिष्टं भोजनं ददाति।

sā bhojanaśālā svādiṣṭaṁ bhojanaṁ dadāti|

सा नदी जलपूर्णा अस्ति।

sā nadī jalapūrṇā asti|

NPTEL

आ - ते तानि ताश्च कथं सन्ति?

ā - te tāni tāśca kathaṁ santi?

शि - ते विद्यालयाः उत्तमाः सन्ति।

śi - te vidyālayāḥ uttamāḥ santi|

तानि मन्दिराणि सुन्दराणि सन्ति।

tāni mandirāṇi sundarāṇi santi|

ताः भोजनशालाः स्वादिष्टं भोजनं ददति।

tāḥ bhojanaśālāḥ svādiṣṭaṁ bhojanaṁ dadati|

ताः नद्यः जलपूर्णाः सन्ति।

tāḥ nadyaḥ jalapūrṇāḥ santi|

NPTEL

आ - तव ग्रामे किं किं प्रचलति ?

ā - tava grāme kiṁ kiṁ pracalati ?

शि - मम ग्रामे प्रातः - बालकः तं विद्यालयं गच्छति।

śi - mama grāme prātaḥ - bālakaḥ taṁ vidyālayaṁ gacchati|

- महिला तत् मन्दिरं गच्छति।

- mahilā tat mandiraṁ gacchati|

- पाचकः तां भोजनशालां गच्छति।

- pācakaḥ tāṁ bhojanaśālāṁ gacchati|

- धीवरः (fisherman) तां नदीं गच्छति।

- dhīvaraḥ tāṁ nadīṁ gacchati|

NPTEL

आ - युष्माकं ग्रामे किं किं प्रचलति ?

ā - yuṣmākaṁ grāme kiṁ kiṁ pracalati ?

2pl m

शि - अस्माकं ग्रामे प्रातः - बालकाः तान् विद्यालयान् गच्छन्ति।

śi - asmākaṁ grāme prātaḥ - bālakāḥ tān vidyālayān gacchanti|

2pl n

महिलाः तानि मन्दिराणि गच्छन्ति।

mahilāḥ tāni mandirāṇi gacchanti|

2pl f ā

पाचकाः ताः भोजनशालाः गच्छन्ति।

pācakāḥ tāḥ bhojanaśālāḥ gacchanti|

2pl f ī

धीवराः ताः नदीः गच्छन्ति।

dhīvarāḥ tāḥ nadīḥ gacchanti|

NPTEL

आ - सः सा च केन कया च सह गच्छति ?

ār - saḥ sā ca kena kayā ca saha gacchati ?

शि - बालकः तेन जनकेन सह तं विद्यालयं गच्छति।

śi - bālakaḥ tena janakena saha taṁ vidyālayaṁ gacchati|

महिला तया सहोदर्या सह तत् मन्दिरं गच्छति।

mahilā tayā sahodaryā saha tat mandiraṁ gacchati|

पाचकः तेन मित्रेण सह तां भोजनशालां गच्छति।

pācakaḥ tena mitreṇa saha tāṁ bhojanaśālāṁ gacchati|

धीवरः तया नौकया सह तां नदीं गच्छति।

dhīvaraḥ tayā naukayā saha tāṁ nadīṁ gacchati|

NPTEL

आ - ते ताश्च कैः काभिश्च सह गच्छन्ति ?

ā - te tāśca kaiḥ kābhiśca saha gacchanti ?

शि - बालकाः तैः जनकैः सह तान् विद्यालयान् गच्छन्ति।

śi - bālakāḥ taiḥ janakaiḥ saha tān vidyālayān gacchanti|

महिलाः ताभिः सहोदरीभिः सह तानि मन्दिराणि गच्छन्ति।

mahilāḥ tābhiḥ sahodarībhiḥ saha tāni mandirāṇi gacchanti|

पाचकाः तैः मित्रैः सह ताः भोजनशालाः गच्छन्ति।

pācakāḥ taiḥ mitraiḥ saha tāḥ bhojanaśālāḥ gacchanti|

धीवराः ताभिः नौकाभिः सह ताः नदीः गच्छन्ति।

dhīvarāḥ tābhiḥ naukābhiḥ saha tāḥ nadīḥ gacchanti|

NPTEL

आ - सः सा च किमर्थं / कस्मै कस्यै तत् तत् करोति ?

ā - saḥ sā ca kimarthaṁ / kasmai kasyai tat tat karoti ?

शि - बालकः तस्मै पाठाय तं विद्यालयं गच्छति।

śi - bālakaḥ tasmai pāṭhāya taṁ vidyālayaṁ gacchati|

महिला तस्यै पूजायै तत् मन्दिरं गच्छति।

mahilā tasyai pūjāyai tat mandiraṁ gacchati|

पाचकः तस्मै भोजनाय ताम् भोजनशालां गच्छति।

pācakaḥ tasmai bhojanāya tām bhojanaśālāṁ gacchati|

धीवरः तस्यै पत्न्यै मत्स्यं धर्तुं तां नदीं गच्छति।

dhīvaraḥ tasyai patnyai matsyaṁ dhartuṁ tāṁ nadīṁ gacchati|

NPTEL

आ - ते ताश्च किमर्थं / केभ्यः काभ्यश्च तत् तत् करोति ?

ā - te tāśca kimarthaṁ / kebhyaḥ kābhyaśca tat tat karoti ?

शि - बालकाः तेभ्यः पाठेभ्यः तान् विद्यालयान् गच्छन्ति।

śi - bālakāḥ tebhyaḥ pāṭhebhyaḥ tān vidyālayān gacchanti|

महिलाः ताभ्यः पूजाभ्यः तानि मन्दिराणि गच्छन्ति।

mahilāḥ tābhyaḥ pūjābhyaḥ tāni mandirāṇi gacchanti|

पाचकाः तेभ्यः भोजनेभ्यः ताः भोजनशालाः गच्छन्ति।

pācakāḥ tebhyaḥ bhojanebhyaḥ tāḥ bhojanaśālāḥ gacchanti|

धीवराः ताभ्यः पत्नीभ्यः मत्स्यान् धर्तुं ताः नदीः गच्छन्ति।

dhīvarāḥ tābhyaḥ patnībhyaḥ matsyān dhartuṁ tāḥ nadīḥ gacchanti|

NPTEL

आ - सः सा च कुतः / कस्मात् कस्याः गच्छति ?

ā - saḥ sā ca kutaḥ / kasmāt kasyāḥ gacchati ?

शि - बालकः तस्मात् गृहात् तं विद्यालयं गच्छति।

śi - bālakaḥ tasmāt gṛhāt taṁ vidyālayaṁ gacchati|

महिला तस्याः वाटिकायाः तत् मन्दिरं गच्छति।

mahilā tasyāḥ vāṭikāyāḥ tat mandiraṁ gacchati|

पाचकः तस्मात् आपणात् तां भोजनशालां गच्छति।

pācakaḥ tasmāt āpaṇāt tāṁ bhojanaśālāṁ gacchati|

धीवरः तस्याः नगर्याः तां नदीं गच्छति।

dhīvaraḥ tasyāḥ nagaryāḥ tāṁ nadīṁ gacchati|

NPTEL

आ - ते ताश्च कुतः / केभ्यः काभ्यश्च गच्छन्ति ?

ā - te tāśca kutaḥ/ kebhyaḥ kābhyaśca gacchanti?

शि - बालकाः तेभ्यः गृहेभ्यः तान् विद्यालयान् गच्छन्ति।

śi - bālakāḥ tebhyaḥ gṛhebhyaḥ tān vidyālayān gacchanti|

महिलाः ताभ्यः वाटिकाभ्यः तानि मन्दिराणि गच्छन्ति।

mahilāḥ tābhyaḥ vāṭikābhyaḥ tāni mandirāṇi gacchanti|

पाचकाः तेभ्यः आपणेभ्यः ताः भोजनशालाः गच्छन्ति।

pācakāḥ tebhyaḥ āpaṇebhyaḥ tāḥ bhojanaśālāḥ gacchanti|

धीवराः ताभ्यः नगरीभ्यः ताः नदीः गच्छन्ति।

dhīvarāḥ tābhyaḥ nagarībhyaḥ tāḥ nadīḥ gacchanti |

NPTEL

आ - सः सा च कस्य कस्याः वा वाहनेन गच्छति ?

ā - saḥ sā ca kasya kasyāḥ vā vāhanena gacchati ?

शि - बालकः तस्य जनकस्य वाहनेन तं विद्यालयं गच्छति।

śi - bālakaḥ tasya janakasya vāhanena taṁ vidyālayaṁ gacchati|

महिला तस्याः सहोदर्याः वाहनेन तत् मन्दिरं गच्छति।

mahilā tasyāḥ sahodaryāḥ vāhanena tat mandiraṁ gacchati|

पाचकः तस्य मित्रस्य वाहनेन तां भोजनशालां गच्छति।

pācakaḥ tasya mitrasya vāhanena tāṁ bhojanaśālāṁ gacchati|

धीवरः तस्याः संस्थायाः वाहनेन तां नदीं गच्छति।

dhīvaraḥ tasyāḥ saṁsthāyāḥ vāhanena tāṁ nadīṁ gacchati|

NPTEL

आ - ते ताश्च केषां कासां वाहनैः गच्छन्ति ?

ā - te tāśca keṣāṁ kāsāṁ vāhanaiḥ gacchanti?

शि - बालकाः तेषां जनकानां वाहनैः तान् विद्यालयान् गच्छन्ति।

śi - bālakāḥ teṣāṁ janakānāṁ vāhanaiḥ tān vidyālayān gacchanti|

महिलाः तासां सहोदरीणां वाहनैः तानि मन्दिराणि गच्छन्ति।

mahilāḥ tāsāṁ sahodarīṇāṁ vāhanaiḥ tāni mandirāṇi gacchanti|

पाचकाः तेषां मित्राणां वाहनैः ताः भोजनशालाः गच्छन्ति।

pācakāḥ teṣāṁ mitrāṇām vāhanaiḥ tāḥ bhojanaśālāḥ gacchanti|

धीवराः तासां संस्थानां वाहनैः ताः नदीः गच्छन्ति।

dhīvarāḥ tāsāṁ saṁsthānāṁ vāhanaiḥ tāḥ nadīḥ gacchanti|

NPTEL

आ - दिनस्य अन्ते तस्मिन् तस्यां वा सन्तोषः अस्ति किम् ?

ā - dinasya ante tasmin tasyāṁ vā santoṣaḥ asti kim ?

शि - आम्। अवश्यम्। तस्मिन् बालके ज्ञानवर्धनेन आनन्दः भवति।

śi - ām| avaśyam| tasmin bālake jñānavardhanena ānandaḥ bhavati|

तस्यां महिलायां भक्त्या सन्तोषः भवति।

tasyāṁ mahilāyāṁ bhaktyā santoṣaḥ bhavati|

तस्यां भोजनशालायां स्वादिष्टं भोजनं खादित्वा तस्मिन् मित्रे सन्तोषः भवति।

tasyāṁ bhojanaśālāyāṁ svādiṣṭaṁ bhojanaṁ khāditvā tasmin mitre santoṣaḥ bhavati|

तस्य धीवरस्य तस्यां पत्न्यां मत्स्यं प्राप्य अतीव आनन्दः भवति।

tasya dhīvarasya tasyāṁ patnyāṁ matsyaṁ prāpya atīva ānandaḥ bhavati|

आ - हे बालक! हे मित्र! हे महिले! हे पत्नि! युष्माकं महत् भाग्यम् अस्ति!

ā - he bālaka! he mitra! he mahile! he patni! yuṣmākaṁ mahat bhāgyam asti!

NPTEL

आ - दिनस्य अन्ते तेषु तासु वा सन्तोषः अस्ति किम् ?

ā - dinasya ante teṣu tāsu vā santoṣaḥ asti kim ?

शि - आम्। अवश्यम्। तेषु बालकेषु ज्ञानवर्धनेन आनन्दः भवति।

śi - ām| avaśyam| teṣu bālakeṣu jñānavardhanena ānandaḥ bhavati|

तासु महिलासु भक्त्या सन्तोषः भवति।

tāsu mahilāsu bhaktyā santoṣaḥ bhavati|

तासु भोजनशालासु स्वादिष्टं भोजनं खादित्वा तेषु मित्रेषु सन्तोषः भवति।

tāsu bhojanaśālāsu svādiṣṭaṁ bhojanaṁ khāditvā teṣu mitreṣu santoṣaḥ bhavati|

तेषां धीवराणां तासु पत्नीषु मत्स्यान् प्राप्य अतीव आनन्दः भवति।

teṣāṁ dhīvarāṇāṁ tāsu patnīṣu matsyān prāpya atīva ānandaḥ bhavati|

आ - हे बालकाः! हे मित्राणि! हे महिलाः! हे पत्न्यः! युष्माकं महत् भाग्यम् अस्ति!

ā - he bālakāḥ! he mitrāṇi! he mahilāḥ! he patnyaḥ! yuṣmākaṁ mahat bhāgyam asti!

NPTEL

गीताश्लोकौ gītāślokau

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।

dhyāyato viṣayānpuṁsaḥ saṅgasteṣūpajāyate|

सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥२।६२॥

saṅgātsañjāyate kāmaḥ kāmātkrodho'bhijāyate ǁ 2|62ǁ

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।

krodhādbhavati sammohaḥ sammohātsmṛtivibhramaḥ|

स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥२।६३ ॥

smṛtibhraṁśād buddhināśo buddhināśātpraṇaśyati ǁ 2|63ǁ

In him whose mind dwells on the objects of sense with absorbing interest, attachment to them is formed;

from attachment arises desire; from desire anger comes forth.

Anger leads to bewilderment; from bewilderment comes loss of memory;

by that the intelligence is destroyed; from destruction of intelligence he perishes.

NPTEL

Gītā: A Sublime Text

Conclusion

In order to approach a creation as sublime as the Bhagavad-Gita with full understanding it is necessary to attune our soul to it.

Rudolph Steiner

Austrian Philosopher, Social Reformer, Architect, Economist

Esotericist and Educationist

(25th or 27th February 1861 – 30th March 1925)

NPTEL

References

- Narendra. (1997). *Functional Sanskrit: its communicative aspect*. Pondicherry: Sri Aurobindo Ashram.
- Narendra. (2003). *Speak Sanskrit: the easy way*. Pondicherry: Sri Aurobindo Ashram.
- Roy, A. (Ed.). (1977). *The Message of the Gita: As Interpreted by Sri Aurobindo.* Pondicherry: Sri Aurobindo Ashram Trust.

NPTEL

शुभं भूयात् ते सदा
śubhaṁ bhūyāt te sadā

NPTEL

NPTEL ONLINE CERTIFICATION COURSES

Thank you



NPTEL